Shodh Prabha: A Multidisciplinary Journal
ISSN: 3108-2726 (Online), Volume-2, Issue-3, (May - June) 2026

# श्रीबालकृष्णभट्टानुसारम् अलङ्कारसारे प्रतिपादिताः शब्दालङ्काराः: एकं विश्लेषणात्मकम् अध्ययनम्

**देवर्षिः अधिकारी**
सहकारी अध्यापकः, बगाधर-ब्रह्म-किशान-महाविद्यालयः, जालाहः, बाक्सा, असमप्रदेशः

**शोधसारांशः**

अलम् इत्यव्ययपूर्वक-कृ धातोः 'भावे' इति पाणिनिसूत्रेण[1] घञि-प्रत्यये कृते सति अलङ्कार इति शब्दः निष्पद्यते। व्युत्पत्तिदृष्ट्या अलङ्कारशब्दः त्रिविधः – भावव्युत्पत्तिनिष्पन्नः करणव्युत्पत्तिनिष्पन्नः कर्त्रर्थप्रधानश्च। काव्यशोभाकराः धर्माः अलङ्काराः इति प्रतिपादयन् आचार्यः दण्डी करणव्युत्पत्तिनिष्पन्नम् अलङ्कारपदम् अङ्गीकरोति। सौन्दर्यमलङ्कारः[2] इति कथयता वामनेन भावव्युत्पत्तिनिष्पन्नम् अलङ्कारपदं स्वीक्रियते। अपि च उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्[3] इति प्रतिपादयन् आचार्यः मम्मटः प्रागुक्तं तृतीयव्युत्पत्तिनिष्पन्नम् अलङ्कारपदं समर्थयति। अस्याः त्रिविधायाः व्युत्पत्तेरनुसारं अलङ्कारः एवंविधं करणम् अथवा असाधारणं साधनम् अस्ति येन सौन्दर्यस्य आधानं भवति। तदित्थं यत्तत्त्वं यो वाऽर्थः शरीरं भूषयति तस्य तत्त्वस्य अर्थस्य वा नाम भवति अलङ्कार इति। संस्कृतसाहित्ये त्रिघरोपनामकस्य बालकृष्णभट्टस्य तथा च तस्य *अलङ्कारसारग्रन्थस्य* महत्त्वपूर्णं स्थानं वर्तते। *अलङ्कारसारग्रन्थे* अलङ्कारस्य किमपि लक्षणं न प्राप्यते। परन्तु सर्वेषाम् आलङ्कारिकाणां मतं प्रदर्श्य अलङ्काराणां विवेचनं बालकृष्णभट्टेन प्रस्तुतम् अस्ति।

**कूटशब्दाः** – अलङ्कारसारः, अलङ्कारशास्त्रम्, शब्दालङ्काराः, काव्यात्मा, अर्वाचीनसंस्कृतपरम्परा।

## प्रस्तावना

संस्कृतसाहित्ये काव्यशास्त्रीयसिद्धान्तविषयकं शास्त्रमेव काव्यशास्त्रम् उच्यते। तदेव अलङ्कारशास्त्रं साहित्यशास्त्रञ्च कथ्यते। तत्र सूक्ष्मातिसूक्ष्मविषयाः निबद्धाः सन्ति। काव्यशास्त्रीययथार्थचिन्तनेनैव विविधसम्प्रदायानां विकासो जातः। काव्यशास्त्रस्य प्रमुखाः विषयाः सन्ति काव्यलक्षणं, काव्यप्रयोजनं, काव्यहेतुः, रसाः, गुणाः, अलंकाराः, काव्यदोषादयः सन्ति।

अलङ्कारशास्त्रं नितरां प्राचीनं शास्त्रं वर्तते। वैदिकसाहित्ये अलङ्कारशास्त्रीयतत्त्वानां स्थितिः तस्य प्राचीनतां प्रमाणयति। शनैः शनैः नाट्यशास्त्रादारभ्य अलङ्कारशास्त्ररूपेण स्वतन्त्रग्रन्थानां रचना अभवत्। भामहस्य काव्यालङ्कारः, दण्डिनः काव्यादर्शः, वामनस्य काव्यालङ्कारसूत्रवृत्तिः इत्यादिभ्यः पण्डितराजजगन्नाथस्य रसगङ्गाधरपर्यन्तम् अलङ्कारशास्त्रस्य प्राचीनधारा प्रचलति। तत्पश्चात् स्वातन्त्र्योत्तरकाले नवीनां काव्यविधां तथा च अनेकनव्यसम्प्रदायमपि आलम्ब्य नव्यकाव्यशास्त्रस्य रचना भवति, यथा भक्तिमाश्रित्य हरिहरानन्दस्य भक्तिरसार्णवः, सत्यमालम्ब्य ब्रह्मानन्दस्य वस्त्वलङ्कारदर्शनम् इत्यादयः। एवम् अलङ्कारशास्त्राणि नव्यतां प्राप्नुवन्ति। प्राचीनकाव्यशास्त्रपरम्परेव अर्वाचीनकाव्यशास्त्रपरम्पराऽपि अत्यन्तं समृद्धा वर्तते। पण्डितराजजगन्नाथोत्तरवर्त्तिकाले अनेकानि काव्यशास्त्राणि काव्यशास्त्रिभिः प्रणीतानि। तेषु आशाधरभट्टस्य त्रिवेणिका, कोविदानन्दः च, अच्युतरायस्य साहित्यसारः, नरसिंहकवेः नञ्जराजयशोभूषणम्, स्वामिकरपात्रिहरिहरानन्दसरस्वत्याः भक्तिरसार्णवः, रेवाप्रसादद्विवेदिनः काव्यालङ्कारकारिका, बालकृष्णभट्टस्य अलङ्कारसारः, छज्जुरामशास्त्रिणः साहित्यबिन्दुः, ब्रह्मानन्दशर्मणः वस्त्वलङ्कारदर्शनं काव्यसत्यालोकः

च, कपिलदेवब्रह्मचारिणः भक्तिरसविमर्शः, शिवज्युपाध्यायस्य साहित्यसन्दर्भः, जगन्नाथपाठकस्य सौन्दर्यकारिका, गोविन्दचन्द्रपाण्डेयस्य सौन्दर्यदर्शनविमर्शः, हरिश्चन्द्रदीक्षितस्य काव्यात्मनिर्णयः, रमाशङ्करतिवार्याः काव्यतत्त्वविवेकः, चन्द्रमौलिद्विवेद्याः रसवसुमूर्त्तिः, शोभामिश्रायाः तृतीयशब्दशक्तिविमर्शः, रामप्रतापवेदालङ्कारस्य चमत्कारविचारचर्चा, विश्वेश्वरसिद्धान्तशिरोमणेः कारिकाग्रन्थः, राजेन्द्रमिश्रस्य अभिराजयशोभूषणम्, राधावल्लभत्रिपाठिनः अभिनवकाव्यालङ्कारसूत्रम् इत्यादीनि उल्लेखयोग्यानि सन्ति।

अस्मिन् शोधग्रन्थे बालकृष्णभट्टस्य अलङ्कारसारोक्ताः शब्दालङ्काराः वर्णिताः सन्ति।

बालकृष्णभट्टोक्ताः शब्दालङ्काराः

मम्मटाचार्यमनुसृत्य अलङ्कारसारकारः आचार्यः बालकृष्णभट्टः *अलङ्कारसारे* षण्णां शब्दालङ्काराणां निरूपणं करोति। ते यथा –

1. वक्रोक्त्यलङ्कारः
2. अनुप्रासालङ्कारः
3. यमकालङ्कारः
4. श्लेषालङ्कारः
5. चित्रालङ्कारः
6. पुनरुक्तवदाभासालङ्कारः

सर्वादौ अत्र वक्रोक्त्यलङ्कारस्य वर्णनं क्रियते।

**वक्रोक्त्यलङ्कारः**

वक्रोक्तिलक्षणनिरूपणावसरे बालकृष्णभट्टः मम्मटस्य *काव्यप्रकाशस्य* तथा च जयदेवस्य *चन्द्रालोकस्य* च वक्रोक्तेः लक्षणं तदीये ग्रन्थे प्रददाति।[4] एकेन वक्त्रा अन्याभिप्रायेण उदितं वाक्यम् अन्येन यदि श्रोत्रा शब्दबोध्यार्थान्तरेण ध्वनिविकारेण वा अन्यार्थकतया संगम्यते सा वक्रोक्तिः। वक्रोक्त्यलङ्कारस्य भागद्वयं बालकृष्णभट्टेन काव्यप्रकाशकारस्य चन्द्रालोककारस्य वक्रोक्त्यलङ्कारस्य लक्षणेन ग्रहीतम्। उभयोः लक्षणे वक्रोक्तेः द्वौ भागौ परिलक्ष्येते। तौ यथा – श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च। श्लेषवक्रोक्त्यलङ्कारे शब्दानां परिवृत्त्यसहत्वेन शब्दस्यैव चमत्काराधायकतया शब्दालङ्कारत्वं ज्ञेयम्। तदुपरि जयदेवस्य लक्षणस्यार्थः यथा शब्दश्लेषेण अर्थश्लेषेण मिलितेन व्यस्तेन वाऽथवा काकूक्त्या यत्र वाच्यार्थपेक्षया भिन्नस्य अर्थस्य कल्पनं भवति तत्रैव वक्रोक्त्यलंकारः भवति। अत्र श्लेषस्य शब्दश्लेषः अर्थश्लेषः इति अर्थस्य भागद्वयमपि प्रकाश्यं भवति। लक्षणोक्तस्य श्लेषालङ्कारस्य द्वौ भागौ स्तः - पदभङ्गश्लेषः अपदभङ्गश्लेषश्च। पदभङ्गश्लेषस्य उदाहरणं यथा–

भवित्री रम्भोरु त्रिदशवदनग्लानिरधुना

स ते रामः स्थाता न युधि पुरतो लक्ष्मणसखः।

इयं यास्यत्युच्चैर्विपदमधुना वानरचमू –

र्लघिष्ठेदं षष्ठाक्षरपरविलोपात्पठ पुनः॥[5]

अर्थात् हे रम्भोरु! रामचन्द्रस्य विनाशानन्तरं देवानां मुखानि अपि मलिनानि भविष्यन्ति, लक्ष्मणस्य अग्रजः यः सः रामचन्द्रः अपि युद्धे मम पुरतः स्थातुं न शक्ष्यति, वानरसेना अधुना इदानीं महत्-विपत्तौ भविष्यति। एतत् श्रुत्वा जानकी अवदत् 'हे लघिष्ठ' अर्थात् 'हे दुष्ट' इति। अस्य श्लोकस्य प्रथमत्रयस्य पादस्य सप्तमाक्षरस्य लोपं कृत्वा ततः पुनः पठित्वा 'त्रिदशवदनग्लानि' इति शब्दस्य स्थाने 'दशवदनग्लानि' इति पदं प्राप्यते यस्यार्थः अस्ति यत् केवलं रावणस्य मुखस्य वर्णः खिन्नः भवति। तथैव द्वितीयपादे 'न' इति सप्तमाक्षरस्य लोपस्य कारणात् 'स ते रामः स्थाता युधि पुरतः' इत्यस्यार्थः स्यात् यत् युद्धे रामचन्द्रः रावणस्य अग्रे तिष्ठति। तृतीये च चरणे 'वि' इति सप्तमाक्षरस्य लोपात् 'वानरचमूः उच्चैः पदं यास्यति' इत्यस्यार्थः यशस्स्वरूपम् उच्चस्थानं प्राप्स्यति इति।


अत्र वक्त्रा अन्याभिप्रायेणोक्तस्य वाक्यस्य श्रोत्रा अन्यार्थकतया अन्वयात् अत्र वक्रोक्तिरलङ्कारः। अस्मिन् श्लोके त्रिदशवदनग्लानीत्यादिनां पदानां द्व्यर्थकत्वात्सर्वत्र श्लेषः। एवं च श्लेषमूलिका वक्रोक्तिरियम्।

अभङ्गमात्रपदेन श्लेषेण ग्रन्थकारः वक्रोक्तिः यथा –

अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता।

त्रिगुणा श्रूयते बुद्धिर्न दारुमयी क्वचित्॥[6]

अस्मिन् श्लोके दारुणेति क्रूरार्थत्वेन वक्तुरभिप्रेतम्, काष्ठेनेत्यर्थपरतयाऽन्यो योजितवान्। अत्र दारुणा क्रुरा काष्ठेनेत्युभयपक्षेऽपि दारुणेति पदस्य न भङ्ग इत्यभङ्गपदश्लेषेण वक्रोक्तिरियम्।




अधुना काकुवक्रोक्तिः यथा –

गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम्।

अलिकुलकोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ॥[7]

अस्मिन् पद्ये प्रवासं जिगमिषौ नायकस्य विषये नायिकायाः सख्याश्च वचनं प्रतिवचनं परिलक्ष्यते एवं हे सखि! गुरुजनपरतन्त्रतया पित्रादिपराधीनतया दूरतरं देशं विषयान्तरं गन्तुम् उद्यतः असौ कान्तः अलिकुलैः भ्रमरसमूहैः

कोकिलैश्च ललिते रमणीये सुरभिसमये वसन्तकाले नैष्यति न आगमिष्यति इति वक्त्रभिप्रायकम् इदं वाक्यम्। अर्थात् नायिकया उक्तम्। अत्र सखीपक्षे तदेव उत्तरयन्त्या सख्या तु न एष्यति अपि तु एष्यत्येवेत्यर्थतया काक्वा (ध्वनिविकारेण) योज्यते। अतः एव काकुवक्रोक्तेः उदाहरणमिदम्। अत्र काकोः शब्दधर्मतया शब्दालङ्कारता, अन्यथा बालकृष्णभट्टेन अयम् अलङ्कारः अर्थालङ्कारेषु अपि परिगण्यते।

**अनुप्रासालङ्कारः**

अनुप्रासालङ्कारनिरूपणावसरे श्रीबालकृष्णभट्टः मम्मटवत् लक्षणं प्रददाति। मम्मटः 'वर्णसाम्यमनुप्रासः' इति लक्षणं प्रददाति। परन्तु अलङ्कारसारकारेण तल्लक्षणं 'व्यञ्जनसादृश्यमनुप्रासः। रसाद्यनुगुणः प्रकृष्टो न्यासोऽनुप्रासः'[8] इति उक्तम्। अर्थात् अनुप्रासालङ्कारे स्वरवैसादृश्येऽपि व्यञ्जनसाम्यमित्यपहाय वर्णसाम्यं व्यञ्जनसादृश्यं वा ग्रहणीयं भवेत्। अनुप्रासपदस्य योगार्थमाह रसाद्यनुगत इति। अत्र अनुशब्दः अनुगमार्थकः, प्रशब्दः प्रकर्षार्थकः, आसशब्दो न्यासार्थकः, अनुगमनं रसादेरिति बोधः। प्रकृतरसव्यञ्जकवर्णसम्बन्धित्वेन प्रकृतरसानुकूलः अनव्यवहिततया चमत्कृत्याधायकः आवृत्तिरेवानुप्रासालङ्कारः।

अलङ्कारसारकारमतेन अनुप्रासालङ्कारः द्विविधः – छेकानुप्रासः वृत्त्यनुप्रासश्च।[9] छेकानुप्रासे अनेकेषां व्यञ्जनानां एकवारमेव वर्णानां सादृश्यम् आवृत्तिर्वा परिलक्ष्यते। छेकशब्दस्यात्र अत्यन्तम् उपादेयता अस्ति। काव्यप्रकाशे छेकशब्दः विदग्धार्थे प्रयुक्तो भवति। नियतवर्णगतः रसविषयकव्यापारः वृत्तिरित्युच्यते। वृत्त्यनुप्रासे वर्णानां प्रयोगावृत्तिक्रियते येन रसाः उपस्क्रियन्ते। एकस्यानेकस्य वा व्यञ्जनस्यासकृत् अनेकवारं साम्यं परो वृत्त्यनुप्रास इत्यर्थः। अस्मिन् अलङ्कारे सङ्घटनानां रीतिनां वा प्रकारान्तरेण अभिव्यक्तिर्भवति बालकृष्णमतेन। अलङ्कारसारे उपनागरिकादीनां वृत्तीनां नाम्नाऽपि कतिपये आचार्याः उल्लिखन्ति।[10] लाटानुप्रासः अस्मिन् ग्रन्थे स्वतन्त्रालङ्काररूपेण परिगण्यते, तथापि लाटानुप्रासः अनुप्रासालङ्कारस्यैव भेदः अस्तीति प्राचीनालङ्काराणां मतम्।[11] तात्पर्यभेदे सति वर्णसमुदायात्मकानां शब्दानाम् अर्थानाञ्च साम्यमेव लाटानुप्रासालङ्कारः।[12] लाटदेशीयानां कवीनां प्रियत्वात् अयमलङ्कारः लाटानुप्रासः कथ्यते।[13]

| माधुर्यगुणव्यञ्जकवर्णाः | ओजगुणव्यञ्जकवर्णाः | प्रसादगुणव्यञ्जकवर्णाः |
|---|---|---|
| • उपनागरिकावृत्तिः<br>• (वैदर्भी रीतिः) | • परुषावृत्तिः<br>• (गौडी रीतिः) | • कोमला (ग्राम्या) वृत्तिः<br>• (पाञ्चाली रीतिः) |

अनुप्रासालङ्कारनिरूपणावसरे बालकृष्णभट्टः अनेकानि उदाहरणानि प्रस्तौति। तेषु एकम् उदाहरणं यथा–

ततोऽरुणपरिस्यन्दमन्दीकृतवपुः शशी।
दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम्॥[14]

महाभारते रात्रियुद्धान्ते द्रोणपर्वणि चतुरशीतिशततमे अध्याये रात्रियुद्धान्तेऽस्य पद्यस्यानुपलम्भात् प्रभातवर्णनमिदमिति कमलाकरभट्टोक्तम्, प्रभातवर्णनेयं व्यासपादानामिति चक्रवर्तिना उक्तम्। अरुणस्य सूर्यसारथेः परिस्यन्देन किञ्चित् चलनेन, न तु पूर्णोदयेन, मन्दीकृतं विरुचीकृतं निष्प्रभीकृतं वपुः यस्य सः चन्द्रः कामेन स्मरेण परिक्षामा क्षीणा या कामिनी तस्याः गण्डवत् कपोलवत् पाण्डुतां शुभ्रतां दध्रे धारयामास इति।

अत्र स्यन्दमन्दीत्यत्र नकारदकारात्मकस्य, गण्डपाण्डु इत्यत्र च णकारडकारात्मकस्यानेकव्यञ्जनस्य सकृत्साम्यमिति

छेकानुप्रास इति।

लाटानुप्रासालङ्कारस्य उदाहरणं यथा –

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।

यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य॥[15]

अस्मिन् श्लोके यस्य पुंसः सविधे दयिता कान्ता नास्ति तस्य तुहिनदीधितिः चन्द्रः दवदहनः (विरहोद्दीपकतया) दावाग्निर्भवति। यस्य तु सविधे दयिता अस्ति तस्य दवदहनः तुहिनदीधितिर्भवतीत्यर्थः। अत्र सविधे-दयितेत्यादीनां बहूनां पदानां तात्पर्यमात्रभेदेनावृत्तिरिति अनेकपदगतो लाटानुप्रासः। पूर्वार्धे तुहिनदीधितौ दवदहनत्वं विधेयम्, उत्तरार्धे तु दवदहने तुहिनदीधितत्वं विधेयमित्युद्देश्यविधेयभावविपर्यासेन शाब्दबोधरूपान्वयभेदात्तात्पर्यभेदोऽत्रेति अवगम्यते।

**यमकालङ्कारः**

एकार्थकत्वाभावे सति स्वरव्यञ्जनानुपूर्वीसाम्यं यमकम्। अर्थे अभिधेये सति अर्थभिन्नानां भिन्नार्थकानां वर्णानां सा पूर्वेणैव क्रमेण स्थिता पुनःश्रुतिः आवृत्तिः यमकमित्युच्यते। यमकं पादवृत्तिः पादांशवृत्तिश्चेति द्विविधम्।[16] पादः इत्यनेन श्लोकचतुर्थांशः। तच्च प्रत्येकम् अनेकताम् अनेकरूपतां प्राप्नोति। पादवृत्तियमकस्य एकादशभेदाः सन्ति –

- मुखयमकम् – द्वितीयपादस्य स्थाने प्रथमपादस्यावृत्तिर्भवति चेत् मुखं नामकं यमकं भवति।[17]
- सन्दंशयमकम् – तृतीयपादस्य स्थाने प्रथमपादस्यावृत्तिर्भवति चेत् सन्दंशं नामकं यमकं भवति।[18]
- आवृत्तियमकम् - चतुर्थपादस्य स्थाने प्रथमपादस्यावृत्तिर्भवति चेत् सन्दंशं नामकं यमकं भवति।[19]
- गर्भयमकम् - तृतीयपादस्य स्थाने द्वितीयपादस्यावृत्तिर्भवति चेत् गर्भनामकं यमकं भवति।[20]
- सन्दष्टयमकम् - चतुर्थपादस्य स्थाने द्वितीयपादस्यावृत्तिर्भवति चेत् सन्दष्टनामकं यमकं भवति।[21]
- पुच्छयमकम् - चतुर्थपादस्य स्थाने तृतीयपादस्यावृत्तिर्भवति चेत् पुच्छनामकं यमकं भवति।[22]
- पङ्क्तियमकम् – प्रथमः पादः त्रिष्वपि द्वितीये तृतीये चतुर्थेऽपि पादे युज्यते तदा पङ्क्तिर्नाम यमकं भवति।[23]
- युग्मकयमकम् – प्रथमः पादः द्वितीये पादे, तृतीयः पादः चतुर्थे पादे युज्यते चेत् मुखपुच्छयोः संयोगात् युग्मकं नाम यमकं भवति।[24]
- परिवृत्तियमकम् – प्रथमः पादः चतुर्थे पादे, द्वितीयः पादः तृतीये पादे युज्यते चेत् आवृत्तिगर्भयोर्योगात् परिवृत्तिर्नामिकं यमकं भवति।[25]
- समुद्गकयमकम् – यत्र अर्द्धपद्यानामेवावृत्तिर्भवति तत्र समुद्गकं नामकं यमकं भवति।[26]
- महायमकम् – सम्पूर्णपद्यस्य आवृत्तिर्भवितत्वात् महायमकं नामकं यमकं भवति।[27]

पादावृत्तियमकवत् पादानाम् अंशानामपि आवृत्तित्वात् पादांशवृत्तिः भवति। पादावृत्तिगतस्य यमकस्य एकादशभेदाः सन्ति।[28] तेषु श्लोकावृत्तिरूपं महायमकं पादांशवृत्तियमके परिगणयितुं न शक्यते।[29] अतः पादांशवृत्तियमकस्य दशभेदाः भवन्ति। पादानि आद्यपादसंयोगे तथा च अन्त्यपादसंयोगे दश-दशभेदत्वात् भागद्वयं भूत्वा पादांशवृत्तेः विंशतिभागाः

भवन्ति। अर्थात् प्रथमपाद्याद्यभागो द्वितीयतृतीयचतुर्थपादाद्यभागेषु यम्यते इति त्रिधा, द्वितीयपादाद्यभागस्तृतीयचतुर्थपादाद्यभागयोर्यम्यते इति द्विधा, तृतीयपादाद्यभागश्चतुर्थपादाद्यभागे यम्यते इत्येकः, प्रथमपादाद्यभागस्त्रिष्वप्याद्यभागेषु यम्यते इत्यपरः इति सप्त शुद्धभेदाः। प्रथमपादाद्यभाग-तृतीयपादाद्यभागयोस्तुल्यत्वे, द्वितीयपादाद्यभाग-चतुर्थपादाद्यभागयोश्च तुल्यत्वेऽपरः संकरः इति नवभेदाः। अर्धावृत्त्या समं पूर्ववत् दश भेदाः। एवमेव अन्त्यभागेऽपि स्वीकार्यम्। पुनरपि यदि पादानां भेदत्रयं भवति, तर्हि तेषां त्रिंशतिभेदाः, तदुपरि पादानां भेदचतुष्टयं क्रियते चेत् तेषां चतुर्विंशतिभेदाः भवन्ति। एते सजातीयाः भेदाः सन्ति।




अधुना विजातीयाः भेदाः व्याख्यायन्ते। विजातीयानां पादांशवृत्तिनां परस्परसम्मिश्रणैः यमकस्य अन्यभेदाः भवितुं शक्नुवन्ति। अन्तादिकयमकम्, आद्यन्तिकयमकम्, तयोः समुच्चयम्, मध्यादिकयमकम्, आदिमध्ययमकम्, तयोः समुच्चयम्, अन्तमध्ययमकम्, मध्यान्तिकयमकम्, पुनरपि तयोः समुच्चयम् इत्यादयः भेदाः भवन्ति। *अलङ्कारसारे* यमकानां विस्तृतानि उदाहरणान्यपि प्रदत्तानि।[30] उदाहरणं यथा –

सन्नारीभरणोमायमाराध्य विधुशेखरम्।

सन्नारीभरणोऽमायस्ततस्त्वं पृथिवीं जय॥[31]

पद्यस्यास्य उल्लेखः सर्वादौ रूद्रटस्य *काव्यालङ्कारे* परिलक्ष्यते। सन्दंशयमकस्य लक्षणावसरे श्लोकोऽयं रूद्रटेन उक्तः। अत्र प्रथमपादस्य तृतीयपादे यमने सन्दंशनामकं यमकम् उदाहरति। अस्यार्थः यथा – हे राजन्! सती नारी बिभर्ति पुष्णातीति सन्नारीभरणा, यद्वा सतीनां नारीणां भरणमाभरणस्वरूपा एवंभूता या उमा गौरी तां याति (शरीरार्धरूपेण) प्राप्नोति यः, यद्वा ताम् अयते प्राप्नोति यः तं विधुशेखरं चन्द्रशेखरं (शिवम्) आराध्य, ततः तदाराधनाद्धेतोः त्वं सन्नाः अवसन्नाः अवसादं गताः, मृताः इति यावत्, अरीणां शत्रूणाम् इमाः गजाः यत्र, तादृशो रणो युद्धं यस्य तथाभूतः सन् पृथिवीं जय सार्वभौमो भवत्येत्यर्थः। कीदृशस्त्वम् – अमायः अकपटः। 'अमायम्' – इति पाठे अमायम् अकैतवं यथा स्यात्तथा आराध्येति सम्बन्धः। अमायेति पाठे अमाय मायाशून्य निष्कपटेति सम्बोधनम्। ततः रणादित्युद्योतकृत्। अत्र प्रथमपादस्य तृतीयपादे यमनात्सन्दंशोनाम यमकम्।

**श्लेषालङ्कारः**

श्रीबालकृष्णभट्टः श्लेषालङ्कारं वर्णयन् *काव्यप्रकाशस्य* कारिकायाः उद्धरणं ददाति।[32] वाच्यभेदेन अर्थभेदेन भिन्नाः शब्दाः युगपद्भाषणम् एकोच्चारणम्, एको यः कण्ठताल्वाद्यभिघातानुकूलयत्न इत्यर्थः, तत् स्पृशन्तीति युगपद्भाषणस्पृशः एकोच्चारणविषयाः सन्तः यत् श्लिष्यन्ति भिन्नं स्वरूपमपह्नुवते (एकरूपतयेव भासन्ते) सः श्लेषः श्लेषनामा शब्दालङ्कारः। असौ श्लेषः अक्षरादिभिः वर्णपदादिभिः अष्टधा अष्टप्रकार इति सूत्रार्थः।

*अलङ्कारसारे कुवलयानन्दस्य* एका कारिका वर्णिता विद्यते यत्र श्लेषालङ्कारस्य विषये प्राप्यते – 'नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः' इति।[33] अर्थात् वर्ण्यावर्ण्योभयास्पदः प्रकृताप्रकृतोभयविषयः नानार्थसंश्रयः

नानाभिधर्म्यार्थस्याश्रयणं श्लेषः श्लिष्यतोऽर्थावस्मिन्निति। तदेव वाक्यं *अलङ्कारसारे* नवमे उल्लासे प्राप्यते।[34] श्लेषस्य भेदत्रयम् अलङ्कारसारकारेण स्वीकृतम्। यथा – प्रकृतानेकविषय-अप्रकृतानेकविषय-प्रकृताप्रकृतानेकविषयश्च। तेषु नेका व्याख्या अलङ्कारसारकारः ददाति।[35] *कुवलयानन्दकारेण* अप्पयदीक्षितेन श्लेषालङ्कारः अर्थालङ्काररूपेण स्वीक्रियते, तदुपरि मम्मटादिभिः आचार्यैः श्लेषः शब्दालङ्कारः मन्यते।[36] शब्दपरिवृत्तिसहिष्णुत्वं यदि श्लेषे भवति तर्हि अर्थश्लेषः कथ्यते तथा च यत्र शब्दपरिवृत्तिसहिष्णुत्वं यदि श्लेषालङ्कारे न परिलक्ष्यते तर्हि शब्दश्लेषः उच्यते। रुय्यकः सभङ्गश्लेषं शब्दालङ्काररूपेण तथा च अभङ्गश्लेषम् अर्थालङ्काररूपेण परिगणयति। सः श्लेषस्य शब्दरूपेण अर्थरूपेण शब्दार्थरूपेण च भेदत्रयं स्वीकरोति।[37] *अलङ्कारमञ्जर्यां* त्रिमल्लभट्टः श्लेषालङ्कारस्योल्लेखः अर्थालङ्कारे करोति। *अलङ्कारसारे* श्लेषालङ्कारः शब्दार्थालङ्काररूपेण वर्णितो दृश्यते। अतः अर्थालङ्काररूपेणापि श्लेषालङ्कारस्योल्लेखं अलङ्कारसारकारः करोति ग्रन्थस्य दशमोल्लासे।[38] शोधग्रन्थस्यास्य परिवर्तिनि अध्याये अर्थालङ्काररूपेण श्लेषालङ्कारस्य विश्लेषणं विधास्यते।

श्लेषालङ्कारस्य अष्टभेदाः *अलङ्कारसारे* परिलक्ष्यते। एतेषां भेदानामेव उल्लेखं मम्मटः अपि करोति।[39] रुद्रटोऽपि *काव्यालङ्कारे* तेषामष्टभेदानामेव उल्लेखं करोति। ते भेदाः यथा – अक्षरश्लेषः,[40] पदश्लेषः[41], लिङ्गश्लेषः[42], भाषाश्लेषः[43], प्रकृतिश्लेषः[44], प्रत्ययश्लेषः[45], विभक्तिश्लेषः[46], वचनश्लेषश्च[47]। सर्वेषां भेदानां निरूपणं रुद्रटकृते काव्यालङ्कारे प्राप्यते। अलङ्कारसारे एतेषां लक्षणानि विहाय केवलानि उदाहरणानि प्राप्यन्ते। मम्मटस्य काव्यप्रकाशे अष्टभेदानामेव सोदाहरणं निरूपणं क्रियते।[48] पदश्लेषस्योदाहरणं यथा –

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव।

विलसत्करेणुगहनं संप्रति सममावयोः सदनम्॥[49]

श्लोकोऽयं विद्याकरस्य *सुभाषितरत्नकोषे* एकोनपञ्चाशत्तमे अध्याये समुपलभ्यते। पद्येऽस्मिन् कविना राज्ञः वर्णनेन सह तस्यापि वर्णनं क्रियते। उभयोः सदनयोः यत् साम्यं तत् पद्येऽत्र प्रयुक्तानां पृथुकार्त्तस्वरपात्रमित्यादीनां पदानां श्लिष्टतया वर्तते। एतेषां पदानां अर्थद्वयं, एकोऽर्थः राजपक्षे द्वितीयोऽर्थस्तु प्रार्थयितुः कवेः पक्षे तदित्थं पदानां श्लिष्टता। तथाहि पृथुकानां बालकानाम् अतिस्वरस्य क्षुत्पीडापीडितानां कातरध्वनेः पात्रमधिकरणं कवेर्गृहम् इति कविपक्षे। राजपक्षे पृथूनि विपुलानि कार्तस्वरस्य सुवर्णस्य पात्राणि भाजनानि इति। इत्थं क्रमेण पदभेदादत्र पदश्लेषः।

एवं प्रकारेण अष्टविधं सभङ्गश्लेषं निरूप्य, अभङ्गश्लेषमुखेन अस्य नवमोऽपि भेदः प्रदर्शितः अलङ्कारसारकारेण। यदि पूर्वप्रतिपादितप्रकृत्यादिरूपभेदकाभावे यथार्थद्वये युगपत् तात्पर्यम् अवगम्यते स नवमो प्रकारः अस्य।[50] उदाहरणं यथा –

योऽसकृत्परगोत्राणां पदच्छेदक्षणक्षमः।

शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते॥[51]

अस्यार्थः यथा इन्द्रपक्षे तु - यः श्रेष्ठपर्वतानां पतत्रं तस्य खण्डने अल्पकालेनैव समर्थः, वज्रेण असुरान् खण्डयतीति शतकोटिदः सः विबुधेन्द्रो देवराजः राजते इति। राजपक्षे तु – यः अनेकवारं शत्रुवंशानां सहायस्य मतस्य वा खण्डने क्षणमात्रेणैव समर्थः, यद्वा छेदरूपे क्षणे उत्सवे क्षमो योग्यः, वज्रतुल्येन अस्त्रेण शत्रून् खण्डयतीति सः विबुधेन्द्रः पण्डितश्रेष्ठो राजा राजते शोभते इत्यर्थः।

एतत् पद्यम् अर्थद्वयं प्रकटयति, एकस्तावत् इन्द्रविषयकः, द्वितीयस्तु राजविषयकः। सर्वेऽत्र प्रकृतिप्रत्ययाः अभिन्ना एव

तथापि द्वितीयोऽर्थः प्रतीयते। वस्तुतः प्रकरणाद्यनियामकाभावात् द्वावप्यर्थौ वाच्यावेव। इत्थमत्र अभङ्गश्लेषः।

अतः परं श्लेषविषये वादद्वयं निरूपितं तत्र प्रथमोऽस्ति यदयं श्लेषः, शब्दालङ्कारः, अर्थालङ्कारः अथवा उभयालङ्कारः? द्वितीयस्तु प्रश्नः यदयं श्लेषालङ्कारः स्वतन्त्रोऽलङ्कारः? अथवा अन्येषामलङ्काराणां केवलम् उपजीवकः? इत्थं पूर्वपक्षोत्तरपक्षद्वारा श्लेषवादनिरूपणं कृतं वर्तते। सारतयाऽत्र एवं वक्तुं शक्यते यत् श्लेषः शब्दालङ्कार एव सभङ्गश्लेषमुखेन अभङ्गश्लेषमुखेन च। श्लेषस्य अपरोऽपि कश्चनैकप्रकारः भवति किन्तु सोऽस्ति अर्थालङ्कारः। अयमस्ति द्वाभ्यां भिन्नः तृतीयप्रश्नः। एवमेव पूर्वाचार्यमतं निरस्यता मम्मटेन स्वीकृतः श्लेषः सर्वथा स्वतन्त्र एवालङ्कारः, अयं तथैव स्वतन्त्रोऽलङ्कारः यथा अन्येऽलङ्काराः। अन्यैरलङ्कारैः सह सङ्करत्वम् उपकार्योपकारकत्वमपि अस्यास्ति इति।[52]

**चित्रालङ्कारः**

यद्यपि वर्णानामाकाशगुणानां खड्गाद्याकृतिहेतुत्मसम्भवति तथापि विन्यस्तवर्णानुमापिका लिपयः सन्निवेशविशेषत्वेन यस्मिन्नलङ्कारे खड्गाद्याकारमुल्लासयन्ति तच्चित्रकाव्यमिति। तल्लक्षणं यथा – सन्निवेश-विशेषेण यत्र न्यस्ता वर्णाः सर्वतोभद्रमुरजचक्रबन्धाद्याकारमुल्लासयन्ति तच्चित्रम्।[53] कष्टसाध्यमेतत्काव्यम्। चित्रालङ्कारस्य इतिहासे दण्डिनः नाम सर्वप्रथममायाति। सः चित्रालङ्कारस्य किमपि लक्षणं न प्रददाति परन्तु चित्रालङ्कारबन्ध-गोमूत्रिकादिनाम् उदाहरणं प्रदाय चित्रालङ्कारं स्पष्टं करोति।[54] चित्रालङ्कारस्य सर्वप्रथमं लक्षणं रुद्रटेन तदीये काव्यालङ्कारे प्रदत्तम्।[55] तन्मतेन काव्ये भङ्गीविशेषानुसारं क्रमं विधाय अक्षराणां विन्यासः यदा क्रियते, तदा विचित्ररूपाणां रचनानां सृष्टिर्जायते, स एव चित्रालङ्कारः कथ्यते। *अग्निपुराणे* गोष्ठ्यां पठनमात्रेण कुतूहलोत्पन्नकारकं कवेः वाग्बन्धं चित्रमुच्यते।[56] यद्यपि ताः रसहीनाः दुष्कररचनाः सन्ति, तथापि सहृदयानां कृते आह्लादप्रदः भवति।[57]

*अलङ्कारसर्वस्वे* चित्रालङ्कारस्य लक्षणं मम्मटानुसारमेवास्ति।[58] *सरस्वतीकण्ठाभरणे* अपि चित्रालङ्कारस्य लक्षणं प्रदीयते।[59] अलङ्कारसारकारः एकस्मिन् श्लोके चित्रालङ्कारस्य सामान्यभेदानां परिचयं ददाति।[60] *अलङ्कारसारे* सर्वतोभद्र-मुरजबन्ध-चक्रबन्धानां चित्रालङ्काराणां सोदाहरणं व्याख्या प्राप्यते। तेषां त्रयाणां चित्राङ्कनम् *अलङ्कारसारस्य* मूलभागे सन्निविष्टं प्राप्यते।[61] चित्राङ्कनं केवलं पाण्डित्यप्रदर्शनार्थं काव्ये प्रयुज्यते। अतः इदं काव्यम् अवररूपेण स्वीकृतम्।

सर्वतोभद्रस्य उदाहरणं प्रदीयते *अलङ्कारसारे* –

सकारनानारकास कायसाददसायका।

रसाहवावाहसारनादवाददवादना॥[62]

अनुलोमेन, प्रतिलोमेन, अनुलोमप्रतिलोमाभ्यां, प्रतिलोमानुलोमाभ्यां च; अधःक्रमेण, उपरिक्रमेण, अधःउपरिक्रमेण, उपर्यधःक्रमेण च उच्चारणे स एव श्लोक आयातीत्येवंरूपम्।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| स | का | र | ना | ना | र | का | स |
| का | य | सा | द | द | सा | य | का |
| र | सा | ह | वा | वा | ह | सा | र |
| ना | द | वा | द | द | वा | द | ना |

Shodh Prabha: A Multidisciplinary Journal
ISSN: 3108-2726 (Online), Volume-2, Issue-3, (May - June) 2026


| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ना | द | वा | द | द | वा | द | ना |
| र | सा | ह | वा | वा | ह | सा | र |
| का | य | सा | द | द | सा | य | का |
| स | का | र | ना | ना | र | का | स |

अस्य हि प्रथमादिपादानामनुलोमनेव प्रतिलोमेनोच्चारणेऽपि ते एव पादाः आयान्ति। एवं प्रतिपादं प्रथमादिवर्णचतुष्टयस्य पञ्चमादिवर्णचतुष्टयस्य वा अनुलोमप्रतिलोमाभ्यां, प्रतिलोमानुलोमाभ्यां वा ते एव पादाः। एवं पादचतुष्टयस्य प्रथमानां अष्टमानां च वर्णानाम् अधःक्रमेण उपरिक्रमेण वा उच्चारणे प्रथमः पादः। अथवा प्रथमवर्णचतुष्टयस्य अष्टमवर्णचतुष्टयस्य वा केवलस्य उपर्यधःक्रमेण, अधःउपरिक्रमेण वा उच्चारणे प्रथमः पादः। एवंरीत्या प्रत्येकपादानां द्वितीयवर्णचतुष्टयेन सप्तमवर्णचतुष्टयेन वा द्वितीयपादस्य, तृतीयवर्णचतुष्टयेन षष्ठवर्णचतुष्टयेन च तृतीयपादस्य, एवं चतुर्थवर्णचतुष्टयेन पञ्चमवर्णचतुष्टयेन च चतुर्थपादस्य च उत्पत्तिरिति भ्रमणम्।

**पुनरुक्तवदाभासालङ्कारः**

अस्य अलङ्कारस्य सन्दर्भे भरत-भामह-वामन-रुद्रटाः किमपि न वदन्ति। उद्भटः काव्यालङ्कारसारसंग्रहे पुनरुक्तवदाभासस्य शब्दालङ्काररूपेण सर्वप्रथमम् उल्लेखं करोति।[63] भोजः लाटानुप्रासस्य समुल्लेखे एव द्विरुक्ति-पुनरुक्त्योः विश्लेषणं कृत्वा अलङ्कारस्यास्य अन्तर्भावम् अनुप्रासालङ्कार एव करोति।[64] मम्मटाचार्यः पुनरुक्तवदाभासं महत्त्वं प्रदाय तल्लक्षणमपि ददाति।[65] विजातीयानुपूर्वीको यः शब्दः तद्गता या आभासीभूतैकार्थकता पुनरुक्तवदाभास इति मम्मटमतार्थः। काव्यप्रकाशे पुनरुक्तवदाभासस्य भेदत्रयं स्वीक्रियते।[66] अलङ्कारसारे पुनरुक्तवदाभासस्य लक्षणमेवं प्रदीयते –

मिथो भिन्नानुपूर्वीकशब्दवृत्तिरेकार्थतावदाभासमानः पुनरुक्तवदाभासनामालङ्कारः।[67]




विभिन्नरूपयोर्वस्तुतो भिन्नार्थकयोरपि शब्दयोरापाततः एकार्थकतया प्रतीतिः पुनरुक्तवदाभासस्तन्नामकोऽलङ्कार इति। किन्तु तत्र एकार्थता नैव स्यात्। एवं प्रकारेण या एकार्थता भासमाना भवति तत्र पुनरुक्तवदाभासालङ्कारः। अत्र लक्षणे 'एकार्थ' तावद् इत्यत्र इवार्थकः वदिति पदं नोपमावाचकम् अपितु अवभासवाचकम् इति। अस्य द्वैविध्यं भवति

शब्दगतत्वेन शब्दार्थगतत्वेन च। अलङ्कारसारकारः पुनरुक्तवदाभासस्य पुनरपि भागत्रयं करोति। यथा – सभङ्गशब्दनिष्ठः, अभङ्गशब्दनिष्ठः, शब्दार्थोभयनिष्ठश्च।[68]

शब्दगतस्य सभङ्गशब्दनिष्ठस्य च उदाहरणं यथा –

अरिवधदेहशरीरः सहसा रथिसूततुरगपादातः।

भाति सदानत्यागः स्थिरतायाभवतितलतिलकः॥[69]

अत्र पद्ये देह-शरीर इति द्वावपि शब्दौ सार्थकौ सभङ्गौ च। सारथि-सूत इति द्वयोराद्यो निरर्थकः अन्त्यः सार्थकः उभावपि सभङ्गौ, दान-त्याग इति उभावपि निरर्थकौ सभङ्गौ चेति पुनरुक्तवदाभासत्वम्।

पुनः शब्दार्थगतस्य शब्दार्थोभयनिष्ठस्य च उदाहरणं यथा –

तनुवपुरजघन्योऽसौ करिकुञ्जररुधिररक्तखरनखरः।

तेजो धाम महः पृथमनसामिन्द्रो हरिर्जिष्णुः॥[70]

अस्मिन् पद्ये तनुवपुश्शब्दयोः शरीरार्थकतया करिकुञ्जरशब्दयोः गजार्थकतया रुधिररक्तशब्दयोः शोणितार्थकतया तेजो-धाम-महः शब्दानां तेजोऽर्थकतया इन्द्र-हरि-जिष्णुशब्दानाम् इन्द्रार्थकतया च आपाततः पौनरुक्त्यम्। अत्र तनु, कुञ्जर, रक्त, धाम, हरि, जिष्णु शब्दाः परिवृत्तिं न सहन्ते। वपुः, करि, रुधिर, इन्द्रशब्दास्तु परिवृत्तिं सहन्ते, इत्यनेन उभयालङ्कारता इति इत्थं निरूपिताः शब्दालङ्काराः। एवमेव *अलङ्कारसारे* शब्दालङ्काराणां विवेचना प्राप्यते।

**सन्दर्भसूची**

1. *अष्टाध्यायी*, 3/3/18
2. *काव्यालङ्कारसूत्रवृत्तिः*, 1/2
3. *काव्यप्रकाशः*, 8/67
4. यदुक्तमन्यथा वाक्यमन्यथान्येन योज्यते ।

   श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा ।। *काव्यप्रकाशः*, 9/78, *अलङ्कारसारः*, 9/1

   वक्रोक्तिः श्लेषकाकुभ्यां वाच्यार्थान्तरकल्पनम् ।

   मुञ्च मानं दिनं प्राप्तं मन्द नन्दी हरान्तिके ।। *चन्द्रालोकः* 5/111, *अलङ्कारसारः*, 9/2
5. *हनुमन्नाटकम्*, 10/12
6. *महासूभाषितसंग्रहः* ( भाग – 2), श्लोकसंख्या 4133
7. *अलङ्कारसारः*, 9/5
8. *अलङ्कारसारः*, पृ. 101
9. *अलङ्कारसारः*, पृ. 101
10. एतादृशैर्माधुर्यव्यञ्जकवर्णैरुपनागरिकारीतिरियमेव वैदर्भी । ओजः प्रकाशकैस्तु परुषा गौडीयमेव ।

प्रसादव्यञ्जकशेषैस्तु कोमला, ग्राम्या पाञ्चालीति नामत्रयवती । *अलङ्कारसारः*, पृ. 101

11. *काव्यप्रकाशः*, 9/81
12. तात्पर्यभेदे सति वर्णसमुदायात्मकशब्दार्थयोः साम्यं लाटानुप्रासः । *अलङ्कारसारः*, पृ. 101
13. लाटजनबल्लभत्वाद्वैदग्धाद्वा लाटानुप्रासः । *अलङ्कारसारः*, पृ. 101
14. *अलङ्कारसारः*, 9/7
15. *अलङ्कारसारः*, 9/9
16. तच्च पादावृत्ति पादांशवृत्ति चेति द्विविधम् । *अलङ्कारसारः*, पृ. 102
17. *अलङ्कारसारः*, पृ. 102
18. *अलङ्कारसारः*, पृ. 102
19. *अलङ्कारसारः*, पृ. 102
20. *अलङ्कारसारः*, पृ. 102
21. *अलङ्कारसारः*, पृ. 102
22. *अलङ्कारसारः*, पृ. 102
23. *अलङ्कारसारः*, पृ. 102
24. *अलङ्कारसारः*, पृ. 102
25. *अलङ्कारसारः*, पृ. 103
26. अर्द्धावृत्ति समुद्गकं नाम । *अलङ्कारसारः*, पृ. 102
27. श्लोकावृत्ति महायमकमिति । *अलङ्कारसारः*, पृ. 102
28. एवमेकादश भेदः । *अलङ्कारसारः*, पृ. 103
29. श्लोकान्तरे हि नासौ भागावृत्तिः । *काव्यप्रकाशः*, नवमोल्लासः, पृ. 411
30. *अलङ्कारसारः*, 9/13-17
31. *अलङ्कारसारः*, 9/15, *काव्यालङ्कारः* 3/5
32. वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः ।

    श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा ।। *अलङ्कारसारः* 9/18, *काव्यप्रकाशः* 9/84
33. *कुवलयानन्दः* 1/62, *अलङ्कारसारः* 9/19
34. *अलङ्कारसारः*, 9/19
35. *अलङ्कारसारः,* पृ. 104
36. *कुवलयानन्द-भूमिका*, पृ. 66
37. एष च शब्दार्थोभयगतत्वेन वर्तमानत्वात्त्रिविधः । तत्रोदात्तादिस्वरभेदात्प्रयत्न- भेदाच्च शब्दान्यत्वे

शब्दश्लेषः । यत्र प्रायेण पदभङ्गो भवति । अर्थश्लेषस्तु यत्र स्वरादिभेदो नास्ति । अतएव न तत्र सभङ्गपदत्वम् । *अलङ्कारसर्वस्वः*, पृ. 96

38. *अलङ्कारसारः*, पृ. 150
39. *काव्यप्रकाशः*, 9/84
40. यत्र विभक्तिप्रत्ययवर्णवशादैकरूप्यमापतति ।
    वर्णानां विविधानां वर्णश्लेषः स विज्ञेयः ।। *काव्यालङ्कारः*, 4/3
41. यस्मिन् विभक्तियोगः समासयोगश्च जायते विविधः ।
    पदभङ्गेषु विविक्तो विज्ञेयोऽसौ पदश्लेषः ।। *काव्यालङ्कारः*, 4/5
42. स्त्रीपुंनपुंसकानां शब्दानां भवति यत्र सारूप्यम् ।
    लघुदीर्घत्वसमासैर्लिङ्गश्लेषः स विज्ञेयः ।। *काव्यालङ्कारः*, 4/8
43. यस्मिन्नुच्चार्यते सुव्यक्तविविक्तभिन्नभाषाणि ।
    वाक्यानि यावदर्थं भाषाश्लेषः स विज्ञेयः ।। काव्यालङ्कारः, 4/10
44. सिद्ध्यति यत्रानन्यैः सारूप्यं प्रत्यययागमोपपदैः ।
    प्रकृतीनां विविधानां प्रकृतिश्लेषः स विज्ञेयः ।। *काव्यालङ्कारः*, 4/24
45. यत्र प्रकृतिप्रत्ययसमुदायानां भवत्यनेकेषाम् ।
    सारूप्यं प्रत्ययतः स ज्ञेयः प्रत्ययश्लेषः ।। *काव्यालङ्कारः*, 4/26
46. सारूप्यं यत्र सुपां तिङां तथा सर्वथा मिथो भवति ।
    सोऽत्र विभक्तिश्लेषो वचनश्लेषस्तु वचनानाम् ।। *काव्यालङ्कारः*, 4/28
47. *काव्यालङ्कारः*, 4/28
48. *काव्यप्रकाशः*, पृ. 511-515
49. *सुभाषितरत्नकोषः*, 49/7
50. यत्र प्रकरणादिभेदकाभावेनार्थद्वयेऽपि तात्पर्यमवगम्यते य नवमोऽपि प्रकारः । *अलङ्कारसारः*, पृ. 106
51. *अलङ्कारसारः*, 9/28
52. एवमलङ्कारान्तर – प्रतिभोत्पत्तौ यत्र चमत्कृतिः श्लेष एव विश्राम्यत्यलङ्कारस्य तु प्रतिभामात्रं जायते तत्र श्लेष एव मुख्योऽलङ्कारो यत्र त्वलङ्कारान्तर एव चमत्कृतिस्तत्रालङ्कारान्तरमेव मुक्यं यत्र तूभयोरपि तथा तत्र सङ्कर इति । *अलङ्कारसारः*, पृ. 107
53. *अलङ्कारसारः*, पृ. 108
54. शब्दार्थालङ्क्रियाश्चित्रमार्गाः सुकरदुष्कराः । *काव्यादर्शः*, 3/186
55. भङ्ग्यन्तरकृततत्क्रमवर्णनिर्मितानि वस्तुरूपाणि ।

साङ्गानि विचित्राणि च रच्यन्ते यत्र तच्चित्रम् ।। *काव्यालङ्कारः*, 5/1

56. *अग्निपुराणम्*, 343/32
57. दुःखेन कृतमत्यर्थे कविसामर्थ्यसूचकम् ।
    दुष्करं नीरसत्वेऽपि विदग्धानां महोत्सवः ।। *अग्निपुराणम्*, 343/32
58. *अलङ्कारसर्वस्वम्*, पृ. 24
59. वर्णस्थानस्वराकारगतिबन्धान् प्रतीह यः ।
    नियमस्तद् बुधैः षोढा चित्रमित्यभिधीयते ।। *सरस्वतीकण्ठाभरणम्*, 2/109
60. वाणवामासनव्योमखड्गमुद्गरशक्तयः ।
    मृदङ्गपद्मभृङ्गारदम्भोलिमुशलाङ्कुशः ।। *अलङ्कारसारः*, 9/34
61. *अलङ्कारसारः*, पृ. 109-110
62. शिशुपालवधम् 19/27, अलङ्कारसारः 9/35
63. *संस्कृत साहित्य में शब्दालङ्कार*, पृ. 168-169
64. *संस्कृत साहित्य में शब्दालङ्कार*, पृ. 169
65. पुनरुक्तवदाभासो विभिन्नाकारशब्दगः ।
    एकार्थतैव शब्दस्य तथा शब्दार्थयोरयम् ।। *काव्यप्रकाशः*, 9/86
66. *काव्यप्रकाशः*, पृ. 535-539
67. *अलङ्कारसारः*, पृ. 111
68. *अलङ्कारसारः*, पृ. 111
69. *अलङ्कारसारः*, 9/389
70. *अलङ्कारसारः*, 9/391